**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2023 SHISRRJ | Volume 6 | Issue 6
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# "ऊनुनूनु" इत्यादि विलोमपाठे प्रश्लिष्टस्वरित्तनिरूपणम्

Dr. S. Surya Narayana Murthy
Asst Professor Department of Krishna Yajurveda, S. V. Vedic.University, Tirupati

**Article Info**
**Publication Issue :**
November-December-2023
Volume 6, Issue 6
**Page Number :** 279-285

**Article History**
Received : 02 Nov 2023
Published : 21 Nov 2023

**शोधसारांश:-** तैत्तिरीयशाखायां विलोमसन्धिषु कुत्रचित् सङ्क्लिष्टस्थलेषु शिक्षाप्रातिशाख्यादि ग्रन्थानुसारं विचारं कृत्वैव स्वरनिर्णय: कर्तव्य: भवति । यत: तादृशस्थलेषु बहूनां विधीनां युगपत्प्राप्ति:, उभयथाव्याख्यानं इत्यादय: अंशा: परिगण्या: भवन्ति। विचार्य स्वीकृतेन निर्णयेनैव सम्प्रदायपाठ: परिरक्षित: भवतीति कृत्वा तथा विचारितेषु अधुना स्वीकृतोऽपि अन्यतम: कश्चन विलोमसन्धिविशेष:।

**कुञ्चिकाशब्दा:-** सन्धिस्वरूपम्, स्वरविचार:, प्रश्लिष्टस्वरितस्य उभयत्र ह्रस्वोकारत्वापेक्षानिरूपणम्, ऊनुनू इत्यत्र सन्धो भागद्वयनिरूपणम्, सन्धिक्रमविचार:, प्रश्लिष्टस्वरनिरूपणम्, मतान्तरोपन्यास:।

**आदौ सन्धि स्वरूपम्**- प्रातिहतस्वरितो वा इति विचार्यते । अथ तथाहि "कुनुनून" इति विलोमपाठस्य ऊ+नु+नु+उ+उ+नु इति विवरणे नु+उ+उ इति.[1]

**जटामुच्चार्यविधिवत् तृतीयं संहितेवहि।**
**विलोमे नानुलोमेन वदेच्चेत्सघनस्मृत: ॥**

इति कौण्डिन्य शिक्षा प्रमाणके घनपाठे आदी "नु" इत्युकारान्तस्य प्रथमेन उकारेण सन्धौ गुणिविधानानुसारं "दीर्घ:ऽ समानाक्षरे सवर्णपरे"[2] इति सूत्रेण ऊकारात्मके एकादेशे सति "नू" इति दीर्घाकारान्ते जाते "नू" इत्यस्य द्वितीयेन उकारेण सन्धी पुन: विधानानुसारं "दीर्घऽ समानाक्षरे सवर्णपरे" [3]इति सूत्रेण ऊकारे सति "नू" इति दीर्घान्तं पदं सिद्धयति॥ विचार.."नू" **नू इत्यत्र स्वरविचार**:- एवं गुणिनाम् अचां सन्धिकार्यानन्तरं नु+उ+उ इति पदत्रयसाध्ये विलोमपाठे प्रथमद्वितीययो: "नु+उ" इत्यनयो: क्रमेण उदात्तानुदात्तयो: उकारयो: "उदात्तमुदात्तवति" [4]इति गुणविधानेन उदात्तप्राप्तौ तदपवादतया "ऊभावे च" [5]इति गुणविधानेन स्वरितो भवति। तदा "नू" इति स्वरितान्तं स्यात् । एवं प्राप्तस्वरितान्तस्य ऊकारस्य परेण अनुदात्तेन उकारेण

1 तै.सं 1.4.34
2 तै.प्रा. 10-2
3 तै.प्रा. 10-2
4 तै.प्रा. 10-10
5 तै. प्रा. 10-17

**Copyright © 2023 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

सन्धी "ऊभावे च[6]" इति सूत्रप्रवृत्तिः न भवति खलु । अत्र वैदिकाभरणकारेण एवमुक्तं "ऊभावे च[7]" इति गुणप्रधानोऽयं विधिः गुणिस्वरस्य "दीर्घ२ समानाक्षरे सवर्णपरे[8]" इत्युक्तत्वात् । तेन अत्र ह्रस्वोकारस्य उदात्तस्य परेण अनुदात्तेन उकारेण ऊभावे सति स्वरितो भवतीति । किञ्च

**उकारादुच्चकान्नीच उकारे परतस्थिते ।**

**उभयोस्सन्धितः प्रोक्तः प्रश्लिष्टस्वरितो बुधैः ॥ [9]**

इति प्रश्लिष्टस्वरितविधायककौण्डिन्यशिक्षाकारिकायां "उकारादुच्चकात्" इति वाक्येन प्रश्लिष्टस्वरितविधाने उदात्तह्रस्वोकारपूर्वकत्वं उक्तम्। तस्मिन् कौण्डिन्यशिक्षावाक्ये उकारात् इति कारप्रत्ययस्य उक्तत्वात् हस्वोकारः इत्यर्थो लब्धः । एवमेव " उच्चकात् " इत्युक्तत्वेन तस्य ह्रस्वोकारस्य उदात्तत्वेनैवभाव्यम्। अत एव आदौ धर्मिप्रक्रियया निष्पन्नस्य "नू" इति दीर्घाकारान्तस्य

**ऊकारस्याप्यनित्यस्य वकारादेश ईरितः ।**

**ह्रस्वोपलक्षणन्यायात् घनसन्धिषु सर्वतः[10] ॥**

"इति कौण्डिन्यशिक्षावाक्याभ्यां उपलक्षणविधया " नु" इति ह्रस्वोकारान्तत्वं सिद्ध्यति । एतेन "नू" इत्यत्र दीर्घः नास्ति। सन्नियोगन्यायेन दीर्घाभावे स्वरितत्वमपि नास्ति । न चेदं कौण्डिन्यवाक्यं वकारादेशे ह्रस्वोपलक्षकमति वाच्यम्, तस्मिन्नेव कैण्डिन्यवाक्ये "घनसन्धिषु सर्वतः" इत्युक्तत्वात्।

**ह्रस्वोपलक्षणन्यायविचारः**- प्रश्लिष्टस्वरितघटितघनसन्धिष्वपि हस्वोपलक्षणन्यायः प्रवर्तते ।वकारादेशप्रसङ्गात् तमधिकृत्य किञ्चिदुच्यते

"अस्माभिरूनु[11]" इत्यस्य विलोमे नू+अस्माभिः इत्यनयोस्सन्धौ यणादेशकर्तव्यतायां "इवर्णोकारौ यवकारी[12]" इति सूत्रे उकार इति कारप्रत्ययस्यसत्वेन प्रकृते "नू" इति दीर्घान्तत्वात् यणादेशाप्राप्तौ इष्टलक्ष्यसिद्ध्यभावः । अतः

**ऊकारस्याप्यनित्यस्य वकारादेश ईरितः ।**

**ह्रस्वोपलक्षणन्यायात् घनसन्धिषु सर्वतः ॥ [13]**

इत्युदाहृतकौण्डिन्यशिक्षया उपलक्षणन्यायेन "नु" इति ह्रस्वोकारान्तत्वं अङ्गीकृतम् ॥

ननु "नू+अस्माभिः" इति विलोमे "नू" इत्यत्र ऊकारस्य अनित्यत्वं कथम् ? इति चेत् प्रातिशाख्ये "सूतूनूमिथूमधूऊ[14]" इति सूत्रेण सांहितस्य "नू" इत्यस्य "नूरणे" इति लक्ष्यस्थस्य दीर्घस्य पदपाठे "नु" इति हस्वत्वं प्राप्तम्। अत एव

6 तै.प्रा.10-17

7 तै.प्रा. 10-17

8 तै.प्रा. 10-2

9 कौ.शि - 114,115

10 कौं. शि- 74,75

11 तै.सं 1.4.34

12 तै.प्रा.10-15

13 कौ. शि- 74,75

14 तै. प्रा. 3-14

नू+अस्माभिरित्यत्र "नू" इत्यत्र ऊकार: अनित्य: तत: "इवर्णोकारौयवकारौ[15]" इति सूत्रे उकार: इति कारप्रत्ययस्य सत्वेन वकारादेशशस्सिद्ध्यतीत्युक्तं इत्यास्तां प्रासङ्गिको विषय: ॥

**प्रश्लिष्टस्वरितस्य उभयत्र ह्रस्वोकारत्वापेक्षानिरूपणम् -** प्रकृते नु+उ+उ इति विलोमे उदात्तह्रस्वोकारान्तात्वं तात्वं सिद्धयति । तेन परेण अनुदात्तेन उकारेण सन्धौ उच्चकादुकारादित्यादि कौण्डिन्यवाक्याभ्यां प्रश्लिष्टस्वरित: सिद्ध्यति । प्रश्लिष्टस्वरितविधाने न केवलं कौण्डिन्यशिक्षायामेव पूर्वोत्तरयो: उकारयो: ह्रस्वत्वनियमोऽस्ति व्यासशिक्षायामपि "उच्चोत्वान्नीच उत्वे स्यात् प्रश्लिष्टस्सन्धितो यम:" व्या.शि. ३ इति स्वरसन्धिप्रकरणीयवाक्यं उकारयो: पूर्वोत्तरयो: ह्रस्वत्वबोधकतपर-करणघटितं दृश्यते। किञ्च "ऊभावे च[16]" इति प्रश्लिष्टस्वरितविधायक सूत्रव्याख्याने व्याख्यात्रो: "उकारस्य उदात्तस्य परेण अनुदात्तेन उकारेण ऊभावे सति तावुभौ स्वरितमादेशं गच्छत:" इति व्याख्यानेन प्रश्लिष्टस्वरितविधाने पूर्वोत्तरयोरुकारयो: ह्रस्वत्वमङ्गीकृतम्

ननु "कखपकारपरष्षमकारपूर्वस्समवग्रह: [17] " इति सूत्रे उकार इत्यत्र कारप्रत्ययस्य अविवक्षितत्वं मत्वा दीर्घत्वमङ्गीकृतम्। अत एव "पतेधनदाधनदास्पते पते धनदा:[18]" इत्यादि विलोमेषु आकारपूर्वकत्वेऽपि विसर्गस्य सत्वं साधितम्। तद्वदत्रापि "उकारादुच्चकान्नीच उकारे परतस्थिते [19] " इति कौण्डिन्यवाक्ये कारप्रत्ययस्य दीर्घोपलक्षकत्वं अङ्गीक्रियताम् इति चेन्न "कखपकारपरष्षमकारपूर्वस्समवग्रह: [20] " इति सूत्रस्थकारप्रत्ययस्य दीर्घोपलक्षकत्वाङ्गीकारे "ग्नास्पति" दृष्टान्तोस्ति उदाहृतकौण्डिन्य-वाक्यस्थकारप्रत्ययस्य दीर्घोपलक्षकत्वसाधकदृष्टान्तादिकं नास्ति। अत: "उकारादुच्चकान्त्रीच उकारे परतस्थिते" इति कौण्डिन्यवाक्यस्थकारप्रत्ययबलात् "नु" इत्युदात्तह्रस्वोकारान्तस्य परेण द्वितीयेन अनुदात्तेन उकारेण गुणसन्धौ "उदात्तमुदात्तवति[21]" इति प्राप्तोदात्तापवादतया उदाहृतव्यासकौण्डिन्य-प्रातिशाख्यव्याख्यानादि वचनै: प्रश्लिष्टस्वरितो भवति । अत एव "ऊनुनूंनु" इति सम्प्रदायसिद्ध-प्रश्लिष्टस्वरितान्तघनपाठ: सिद्ध्यति ॥

**ऊनुनू इत्यत्र सन्धो भागद्वयनिरूपणम्** -ननु एतावता नु+ उ इति प्रथमभागीयसन्धि: तत: उपलक्षणविधया प्राप्तह्रस्वोदात्तोकारान्तस्य "नु" इत्यस्य द्वितीयेन अनुदात्तोकारेण द्वितीयभागीयसन्धि: इति सन्धिद्वयं प्राप्तम्। अनयो: भागयोर्मध्ये द्वितीयभागे एव प्रश्लिष्टस्वरित: श्रूयते । प्रथमभागेऽपि प्रश्लिष्टस्वरित: कुतो न श्रूयते इति चेन्न, प्रथमत: "नु" इत्युदात्तान्तस्य उकारस्य सवर्णदीर्घवशात् "नू" इति प्राप्तदीर्घान्तस्य गुणविधानानुसारं स्वरितान्तत्वं यद्यपि प्राप्तम् । एवं "नू" इति प्रश्लिष्टस्वरितान्तेन उकारस्य अनुदात्तस्य द्वितीयस्य उकारस्य च सन्धि: कर्तव्य:। तदा सवर्णदीर्घ सति "उदात्तमुदात्तवति[22]" इत्युदात्त: न सिद्धयति । नू+उ इत्यनयो: अन्यतरस्य उदात्ताभावात् प्रथमस्य स्वरितान्तत्वात् द्वितीयस्य उकारस्य अनुदात्तत्वात् न चात्र "स्वरितानुदात्तसन्निपाते स्वरितं [23] " सूत्रप्रवृत्तिरस्ति सन्निपातस्वरितलक्षणसूत्रात् पूर्वमेव

---

15 तै. प्रा. 10-15
16 तै.प्रा.10-17
17 तै. प्रा. 8-23
18 तै.सं.1.7.10.2
19 कौ.शि.114
20 तै.प्रा.8-23
21 तै.प्रा. 10-10
22 तै. प्रा. 10-10
23 तै.प्रा. 10-12

सवर्णदी- र्घसूत्रप्रवृत्तेस्सत्वात् सन्निपातस्वरितस्य नित्यस्वरितविषयकत्वात्, प्रकृतस्य प्रश्लिष्टस्वरितविषयकत्वात् । एवं प्राप्तेन "नू" इति स्वरितदीर्घाकारान्तेन द्वितीयानुदात्तोकारस्य सन्धितः प्रश्लिष्टस्वरितो न भवेत् । ह्रस्वोदात्तपूर्वकत्वं प्रश्लिष्टस्वरिते तन्त्रमिति उदाहृतव्यास-कौण्डिन्य-प्रातिशाख्य-व्याख्यानवचनेषु कृप्तम्। अतः "नू" इति दीर्घाकारान्तत्वेन वा स्वरितान्तत्वेन वा अस्मात्परेण अनुदात्तेन उकारेण गुणविधानेन प्रश्लिष्टस्वरितासिद्ध्या "अनुनू" इति प्रश्लिष्टस्वरितान्तघनपाठसम्प्रदायस्य विरोधो भवेत्। अतः "ऊनुनू" इति प्रश्लिष्टस्वरितान्तघनपाठान्यथानुपपत्त्या "ऊनुनू" इति प्रश्लिष्टस्वरितान्तघनपाठस्य "नु" इत्यन्तोकारस्य उदात्तत्वं विना अनुपपन्नत्वात् नु+उ इत्यनयोः प्रथमसन्धितः "नू" इति दीर्घाकारान्तत्वं वा स्वरितान्तत्वं वा न वक्तव्यम् । अतः "नू" इत्यत्र प्रथमं प्राप्तस्य दीर्घस्य ऊकारस्य उत्तरेण ह्रस्वेन अनुदात्तेन उकारेण सन्धौ प्रश्लिष्टस्वरितो न घटत इति "नू" इत्यस्य "नु" इति ह्रस्वान्तत्वं उदात्तत्वं चाङ्गीकृतम्। अत एव "ऊनुनू" इति घनपाठे द्वितीय-नू इत्यत्र ऊकारस्य ह्रस्वत्वं न क्रियते, सन्ध्यनुष्ठानप्रसक्त्यभावात्। यतः "नू" इत्यनन्तरं अज्वर्णाभावात्, "नु" इति हलादिपरकत्वाच्च। एवञ्च व्यासशिक्षायां स्वरसन्धिप्रकरणस्थस्य "उच्चोत्वान्नीच उत्वे स्यात् प्रश्लिष्टस्सन्धितो यमः [24] " इति वाक्यस्य व्याख्याने वेदतैजसव्याख्यातुः "ऊनुनूनु" "उतुतूतु" इति प्रश्लिष्टस्वरितान्तविलोमोदाहरणं सङ्गच्छते

**नु+उ+उ+ इत्यत्र सन्धिक्रमविचारः** - ननू भो नु+उ+उ+ इति पदात्रय साद्ये घनपाठे आदौ उ+उ+ इत्यानयो संधि किमर्थं न क्रियते ? इति चेत् न। यथा "भक्षैहि" इत्यनिष्टरूपनिवारणाय भक्ष+आ+इहि इत्यनुलोमे पूर्वम् आ+इहि इत्यनयोस्सन्धिमकृत्वा भक्ष+आ इत्यनयोरेव आदौ सन्ध्यनुष्ठानं, ततः भक्षा+इहि इत्यनयोः सन्ध्यनुष्ठानात् "भक्षेहि" इति वेदपाठसम्प्रदायसिद्धोच्चारणं साधयन्ति शिष्टाः । तथा उ+उ आत्यनयोः आदी सन्धिं न कुर्वन्ति। यदि उ+उ इत्यनयोः आदौ प्रसक्तसवर्णदीर्घस्य पूर्वापवादन्यायेन "उकारोऽपृक्तः प्रकृत्या वकारोऽन्तरे" तै. प्रा- तै. प्रा इति सूत्रेण उकारयोर्मध्ये वकारागमः प्राप्नुयात्, तेन "वु" इति जाते, तस्य "नु" इत्यनेन संयोजने "नुउवुनु" इत्यनिष्टरूपापत्तिः स्यात्। तदा "ऊनुनूं" इत्यूकारान्तप्रश्लिष्टस्वरितान्तविलोमपाठस्य सम्प्रदायसिद्धस्य विच्छेदः स्यात्। यत्र "यानग्नयोऽन्वतप्यन्त तत्र पूर्व कृते यणि" इति विशेषवाक्यमस्ति, तत्रैव द्वितीयतृतीययोः पदयोः आदौ सन्धिः क्रियते। प्रकृते उ+उ इत्यनयोः आदौ सन्ध्यनुष्ठानं कर्तव्यमिति बोधकवाक्याभावात्, उ+उ इत्यनयोः आदौ सन्धिः न क्रियते । अत एव नु+उ इत्यनयोरेव आदौ सन्ध्यनुष्ठानादिना "नुउवुनु" इत्यनिष्टरूपापत्तिदोषः परिहतो भवति। "ऊनुनूं" इति प्रश्लिष्टस्वरितान्तसम्प्रदायसिद्धघनपाठश्च सिद्ध्यति ॥

**ऊहतिदिक्षु इत्यत्र स्वरविचारः** -नानू व्यूहति दिक्षु[25]" इत्यत्र वि ऊहति इत्यनयोरनुलोमे इकारस्य ऊकारे परे सति "इवर्णोकारी यवकारौ[26]" इति सूत्रेण यकारादेशो भवति। एवमेव दिक्षु ऊहति इति विलोमेऽपि उकारस्य ऊकारे परे सति सवर्णदीर्घेण ऊकारे सति प्रश्लिष्टस्वरितः कुतो न भवति इति चेत्, विषमो दृष्टान्तः, भिन्नसन्धिविषयत्वात्। वि+ऊहति इत्यनयोः सन्धौ "इवर्णोकारौ यवकारौ[27] " इति सूत्रं अच्सामान्य-परनिमित्तक-यणादेशविधायकं भवति। एवमेव दिक्षु ऊहति इत्यनयोः धर्मिप्रक्रियायां उकारस्य अच्सामान्यपरत्वात् "इवर्णोकारौ यवकारी[28]" इति प्रसक्तस्य वकारादेशस्य पूर्वापवादन्यायेन "दीर्घं

24 व्या शि 300

25 तै.सं.2-3-13-3

26 तै. प्रा 10-15

27 तै. प्रा 10-15

28 तै. प्रा 10-15

समानाक्षरे सवर्णपरे[29]" इति पूर्वोत्तर+उवर्णविषयकत्वेन प्राप्तस्य ऊकारस्य "ऊभावे च[30]" इति सूत्रेण स्वरितो न भवति। यत: "ऊभावे च[31]" इति सूत्रस्य पूर्वोत्तर-हस्वोकार-स्थानिकस्य ऊकारस्यैव स्वरितत्वविधायकत्वात् अपवादत्वम् । विषयोऽयं "ऊभावे च[32]" इति सूत्रव्याख्याने गार्ग्यगोपा- लयज्वना स्पष्टमुक्तम्। अत एव "ऊभावे च[33]" इति सूत्रप्राप्तस्वरित: "ऊनुनू", "उतुतूंतु" इत्यादिष्वेव सिद्ध्यति इति पूर्वोक्तं न विस्मर्तव्यम्। एवं "ऊभावे च[34]" इति सूत्रप्राप्त: प्रश्लिष्टस्वरित: "ऊभावे प्रश्लिष्ट:[35]" इति सूत्रेण प्रश्लिष्टसंज्ञको भवति । दिक्षु ऊहति इत्यत्र पूर्वत्र उकारस्य ह्रस्वस्य सत्वेऽपि परत्र हस्वोकारो नास्ति । तथा च दिक्षु ऊहति इति विलोमे सन्धिवशात् प्राप्त: ऊकार: "उदात्तमुदात्तवति[36]" इति सूत्रेण उदात्त एव भवति। तत: ऊकारात् उदात्तात् परस्य हकारस्थस्य अकारस्य अनुदात्तस्य "उदात्तात्परोऽनुदात्त: स्वरितम्[37]" इति सूत्रेण प्रातिहतस्वरितो भवति, नानापदविषयकत्वात् । न तु प्रश्लिष्टस्वरित इत्यपि प्रागुक्तं स्मार्यते ॥

**मतान्तरोपन्यास**: - ये दिक्षु ऊहति इत्यत्र प्रश्लिष्टस्वरितं मन्यन्ते, ते एवं कल्पयन्ति – कथम् ? "उच्चोत्वान्नीच उत्वे स्यात् प्रश्लिष्टस्सन्धितो यम:[38]" इति व्यासशिक्षास्थस्वरसन्धि- प्रकरणीयवाक्यस्थ-तकारयो: न तत्कालार्थबोधकत्वम्, किन्तु सुखोच्चारणार्थकत्वमेव । यथा "क्षेप्रकम्पश्चतुर्धेवमादूदेदैन्द्धिरुच्यते" 304 इति व्यासशिक्षास्थक्षेप्रकम्पाधिकृतवर्णनिरूपण-वाक्ये आत्, ऊत्, एत्, ऐत् इत्येवं श्रूयमाणास्तकारा: उच्चारणार्था एव। यस्माद्दीर्धवर्णानामेव कम्पा भवन्ति। आत्, ऊत्, एत्, ऐत् इत्यादिषु श्रूयमाणतकाराणां ह्रस्वादि- व्यावृत्त्यर्थकत्वाभावात्, सुखोच्चारणार्थकत्वमेव । एचां ह्रस्वाभावात्, क्वचित् अकार-उकारयो: कम्पप्रसङ्गेऽपि "अदीर्घ दीर्घवत् कुर्यात्" इति शिक्षावचनेन आकार ऊकार इति दीर्घत्वसम्पादनाच्च । तद्वत् "उच्चोत्वान्नीच उत्वे स्यात् प्रश्लिष्टस्सन्धितो यम:" 300 इति व्यासवाक्यस्थतकारयो: उच्चारणार्थकत्वमेव । तथात्वे "उच्चोत्वान्नीच उत्वे......" 300 इति व्यासवाक्यस्थतकारयो: दीर्घादिव्यावृत्त्यर्थकत्वाभावात्, दिक्षु ऊहति इति विलोमे दीर्घोकारपरत्वेऽपि प्रश्लिष्टसन्धिघटितं रूपं सिद्ध्यति इति तदसत्। "स्वरस्य कारतोऽत्तर:" इति व्यासशिक्षास्थ-संज्ञाप्रकरणीय-वाक्यव्याख्याने वेदतैजसव्याख्यातु: "तकार: कुत्रचित् ( रोपन्यास:सुखोच्चार )

(प्रा: 10- यकत्वात् कारस्य न) सुखोच्चारणार्थम्" इति व्याख्याने तकार: कुत्रचिदेव सुखोच्चारणार्थम् इति कथनेन तकाराणां सर्वत्र सुखोच्चारणार्थकत्वं सिद्धयति, किन्तु कुत्रचिदेव । अत: "क्षेप्रकम्पश्चतुर्धेवमादूदेदैद्धिरुच्यते" 304 इति व्यासवाक्यस्थतकाराणां व्यावर्त्याभावात् तपरकरणत्वं मास्तु । "उच्चोत्वान्नीच उत्वे......" 300 इति व्यासवाक्यस्थतकाराणां दीर्घव्यावृत्त्यर्थकत्वम् अवश्यमङ्गीकर्तव्यम्। अन्यथा "उकारादुच्चकान्नीच उकारे परतस्स्थिते" 114 इति कौण्डिन्यवाक्यस्थ-ह्रस्वोकारविधानस्य, "ऊभावे च" तै. प्रा. 10-17 इति सूत्रस्य पूर्वत्र उकारस्य उदात्तस्य परत्र अनुदात्तेन ह्रस्वोकारेण सन्धौ

29 तै. प्रा. 10-2
30 तै.प्रा: 10- 17
31 तै.प्रा: 10- 17
32 तै. प्रा. 10-17
33 तै.प्रा. 10-17
34 तै.प्रा. 10- 17
35 तै.प्रा. 20-05
36 तै.प्रा. 10-10
37 तै. प्रा. 14-29
38 व्या.शि 300

स्वरितविधानस्य च व्याकोपः स्यात् । अतः प्रमाणभूत-कौण्डिन्यवाक्य-प्रातिशाख्यसूत्र-व्याख्यानद्वयानुसारं "उच्चोत्वान्नीच उत्वे......" 300 इति व्यासवाक्येऽपि तकारयोः तपरकरणत्वम् अङ्गीकर्तव्यमेव । एवं सति "दिक्षु+ऊहति" इत्यत्र स्वारसन्धौ ह्रस्वस्य उकारस्य परत्राभावात् प्रश्लिष्टस्वरितो न भवति । किन्तु पूर्वोदात्तपरानुदात्तयोः उकार-ऊकारयोः गुणविधाने "उदात्तमुदात्तवति[39]" इत्युदात्तत्वमेव । ततः "उदात्तात्परोऽनुदात्तः स्वरितम्[40]" इति स्वरित एव । स च प्रातिहत एव, नानापदविषयकत्वात् ।।

न च "ऊहति" इत्यत्र ऊकारस्यापि "ऊकारस्याप्यनित्यस्य...." 74,75 इत्यादि- कौण्डिन्यवाक्याभ्यां ह्रस्वोपलक्षणन्यायात् ह्रस्वत्वमस्तु इति वाच्यम्, "ऊहति" इत्यत्र ऊकारस्य नित्यत्वात् । "ऊकारस्याप्यनित्यस्य...." 74,75 इत्यादिकौण्डिन्यवाक्याभ्यां अनित्यस्य ऊकारस्यैव ह्रस्वत्वमङ्गीकृतम्। एवं दिक्षु ऊहति इत्यनयोस्सन्धितः "उदात्तमुदात्तवति[41]" इति प्राप्तोदात्तात् ऊकारात् परस्य हकारस्थस्य अकारस्य "उदात्तात्परोऽनुदात्तः स्वरितम्[42]" इति स्वरितो भवति। स च नानापदलक्षणःप्रातिहतस्वरितः ॥

**उदाहरणान्तरेष्वपि प्रश्लिष्टस्वरनिरूपणम्** -एवमेव "उतुतूं", "न स्यूंषुणः" इत्यादावपि प्रश्लिष्टस्वरितान्तविलोमपाठः सिद्ध्यति। कथम् ? "उतुतूत्वै वै तूत्वै" इत्यत्र विलोमे तु+उ+उ इति पदत्रयसाध्ये, एवमेव "ऊषुणोणस्सूषुणः" इत्यत्र विलोमे सु+उ+उ इति पदत्रयसाध्ये पाठद्वये तु+उ इत्यनयोः सु+उ इत्यनयोश्च आदौ गुणिप्रक्रियया "तू" इति "सू" इति जाते ऊकारयोः द्वयोरपि अनित्यत्वात्, "ह्रस्वोपलक्षणन्यायात् घनसन्धिषु सर्वतः" इति कौण्डिन्यवाक्यतः ह्रस्वत्वे सति, ततः तु+उ, सु+उ इति द्वितीयोकाराभ्यां सन्धौ पुनः "तू" इति "सू" इति सिद्ध्यति । आदौ कृतह्रस्वान्तयोः 'तु', 'सु' इत्यनयोः गुणविधानेन "उदात्तमुदात्तवति[43]" इति सामान्यशास्त्रेण उदात्तत्वमेव । न तु "ऊभावे च[44]" इत्यपवादशास्त्रेण स्वरितत्वमङ्गीक्रियते । यतः तु+उ, सु+उ इत्येतेषां द्वितीयसन्धौ उदात्तह्रस्वोकारपूर्वकत्वम् आवश्यकम्। सन्नियोग-न्यायप्राप्तयोः स्वरितयोः मध्ये दीर्घाभावे दीर्घप्रयुक्तस्वरितमपि न स्यात् । अर्थात् ह्रस्वत्वम् उदात्तत्वं च सिद्धम्। अन्यथा "तूंत्वै", "सूंषुर्णः" इति लक्ष्यद्वये 'तू' इति 'सू' इत्युभयोः प्रश्लिष्टस्वरितान्तत्वं न सिद्ध्येत् ॥

नन्वेवमपि तु+उ+उ इत्यत्र च आदावेव द्वयोरुकारयोः सन्ध्यनुष्ठानं क्रियताम् इति चेत्, उच्यते उ+उ इत्यनयोः आदावेव सन्ध्यनुष्ठाने प्रसक्तसवर्णदीर्घस्य पूर्वापवादन्यायेन "ऊकारोऽप्रकृत्यः प्रकृत्या वकारोऽन्तरे[45]" इति सूत्रेण प्रत्येकम् उकारयोर्मध्ये वकारागमो भवति। तदा यथाक्रमं "तुउवुत्वै", "सुउवुषुणः" इति अनिष्टरूपापत्तिः दोषः। वकारागमानन्तरं "दीर्घं२ समानाक्षरे सवर्णपरे[46]" इति सूत्रेण सवर्णदीर्घो न स्यात्, उकारयोर्मध्ये वकारस्य अन्तरितत्वेन अच्परकत्वाभावात्। अतः पूर्वोक्तानिष्टरूपापत्ति- दोषवारणार्थम् उकारयोः पूर्वं सन्धिः न कर्तव्यः। पदानां क्रमेणैव यथा "ऊनुनूनु[47]" इत्यत्र

39 तै.प्रा. 10-10
40 तै. प्रा. 14-29
41 तै.प्रा. 10-10
42 तै.प्रा.14- 29
43 तै. प्रा. 10-10
44 तै. प्रा. 10-17
45 तै. प्रा. 9-16
46 तै. प्रा. 10-2
47 तै.सं.1-4-34

प्रश्लिष्टस्वरितान्तत्वं सिद्धम्। तथैव “उतुतूत्वै”, “न तूषुण:” इत्यत्रापि प्रश्लिष्टस्वरितान्त- सिद्ध्यर्थं प्रक्रिया कार्या। एवमुदाहृतलक्ष्येषु प्रश्लिष्टस्वरितान्तत्वं साधयित्वा, सम्प्रदायसिद्ध- प्रश्लिष्टस्वरितान्त-घनपाठसंरक्षणं कर्तव्यम् इति दिक्।।

## Reference Books:-


1. Taittiriya Pratishakhya,Government orient library, mysore ,1906
2. Vyasashiksha Veda mimamsa research center, varanasi, 1973
3. bhavishishya puranam gita press, Gorakhpur-1999
4. Brahma puranam, gita press, Gorakhpur, 2015
5. Skanda puranam, Choukhambha Sanskrit series, banaras,2003
6. Vishnudharmittara Puranam , Choukhambha surabharati prakashan , Banaras, 2016
7. Kaundinya shiksha,Veda bhavan , Hyderabad, 2015
8. Taittiriya Samhita, Sripada Damodara Satavalekr, Svadyaya mandal , Gujarat -1999